# 1008 names of Gayatri

# श्रीगायत्रीसहस्रनामावलिः

## Document Information

Text title : 1008 names of Gayatri Devi

File name : gayatri1008.itx

Category : sahasranAmAvalI, devii, gAyatrI, nAmAvalI, devI

Location : doc_devii

Author : Veda Vyas

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Chapter 6, Book 12, of Devi Bhagavata. See corresponding stotram. akArAdikShakArAnta

Latest update : March 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

1008 names of Gayatri

# श्रीगायत्रीसहस्रनामावलिः

(अकारादिक्षकारान्तादिनामघटितम्)

ध्यानम् -

रक्तश्वेतहिरण्यनीलधवलैर्युक्ता त्रिनीत्रोज्ज्वलां
  रक्तां रक्तनवस्रजं मणिगणैर्युक्तां कुमारीमिमाम् ।
गायत्रीं कमलासनां करतलव्यानद्धकुण्डाम्बुजां
  पद्माक्षीं च वरस्रजं च दधतीं हंसाधिरूढां भजे ॥

ॐ अचिन्त्यलक्षणायै नमः । अव्यक्तायै । अर्थमातृमहेश्वर्यै ।
अमृतार्णवमध्यस्थायै । अजितायै । अपराजितायै । अणिमादिगुणाधरायै ।
अर्कमण्डलसंस्थितायै । अजरायै । अजायै । अपरायै ।
अधर्मायै । अक्षसूत्रधरायै । अधरायै । अकारादिक्षकारान्तायै ।
अरिषड्वर्गभेदिन्यै । अञ्जनाद्रिप्रतिकाशायै । अञ्जनाद्रिनिवासिन्यै ।
अदित्यै । अजपायै नमः । २०

ॐ अविद्यायै नमः । अरविन्दनिभेक्षणायै । अन्तर्बहिस्थितायै ।
अविद्याध्वंसिन्यै । अन्तरात्मिकायै । अजायै । अजमुखवासायै ।
अरविन्दनिभाननायै । अर्धमात्रायै[व्यञ्जनवर्णात्मिकायै] ।
अर्थदानज्ञायै । अरिमण्डलमर्दिन्यै । असुराघ्न्यै । अमावास्यायै ।
अलाक्षिघ्न्यै । अन्त्यजार्चितायै । आदिलक्ष्म्यै । आदिशक्त्यै । आकृत्यै ।
आयताननायै । आदित्यपदविचारायै नमः । ४०

ॐ आदित्यपरिसेवितायै नमः । आचार्यायै । आवर्तनायै । आचारायै ।
आदिमूर्तिनिवासिन्यै । आग्नेय्यै । आमर्यै । आद्यायै । आराध्यायै ।
आसनस्थितायै । आधारनिलयायै । आधारायै । आकाशान्तनिवासिन्यै ।
आद्याक्षर समयुक्तायै । आन्तराकाशरूपिण्यै । आदित्यमण्डलगतायै ।
आन्तरध्वान्तनाशिन्यै । इन्दिरायै । इष्टदायै । इष्टायै नमः । ६०

ॐ इन्दिवरनिवेक्षणायै नमः । इरावत्यै । इन्द्रपदायै । इन्द्राण्यै ।

इन्दुरूपिण्यै । इक्षुकोदण्डसंयुक्तायै । इषुसन्धानकारिण्यै ।
इन्द्रनीलसमाकारायै । इडापिङ्गलरूपिण्यै । इन्द्राक्ष्यै ।
ईश्वर्यै । ईहात्रयविवर्जितायै । उमायै । उषायै । उडुनिभायै ।
उर्वारुकफलाननायै । उडुप्रभायै । उडुमत्यै । उडुपायै ।
उडुमध्यगायै नमः । ८०

ॐ ऊर्धायै नमः । ऊर्धकेश्यै । ऊर्धाधोगतिभेदिन्यै ।
ऊर्ध्ववाहुप्रियायै । ऊर्मिमालावाग्ग्रन्थदायिन्यै । ऋतायै । ऋष्यै ।
ऋतुमत्यै । ऋषिदेवनामसकृतायै । ऋग्वेदायै । ऋणहर्त्र्यै ।
ऋषिमण्डलचारिण्यै । ऋद्धिदायै । ऋजुमार्गस्थायै । ऋजुधर्मायै ।
ऋजुप्रदायै । ऋग्वेदनिलयायै । ऋज्व्यै । लुप्तधर्मप्रवर्तिन्यै ।
लुतारिवरसम्भूतायै नमः । १००

ॐ लुतादिविषहारिण्यै नमः । एकाक्षरायै । एकमात्रायै । एकायै ।
एकैकनिष्ठितायै । ऐन्द्र्यै । ऐरावतारूढायै । ऐहिकामुष्मिकप्रदायै ।
ओङ्कारायै । ओषध्यै । ओतायै । ओतप्रोतनिवासिन्यै । और्भायै ।
औषधसम्पन्नायै । औपासनफलप्रदायै । अण्डमध्यस्थितायै ।
अःकारमनुरूपिण्यै[विसर्गरूपिण्यै] । कात्यायन्यै । कालरात्र्यै ।
कामाक्ष्यै नमः । १२०

ॐ कामसुन्दर्यै नमः । कमलायै । कामिन्यै । कान्तायै । कामदायै ।
कालकण्ठिन्यै । करिकुम्भस्तनभरायै । करवीरसुवासिन्यै । कल्याण्यै ।
कुण्डलवत्यै । कुरुक्षेत्रनिवासिन्यै । कुरुविन्ददलाकारायै । कुण्डल्यै ।
कुमुदालयायै । कालजिह्वायै । करालास्यायै । कालिकायै । कालरूपिण्यै ।
कामनीयगुणायै । कान्त्यै नमः । १४०

ॐ कलाधारायै नमः । कुमुद्वत्यै । कौशिक्यै । कमलाकारायै ।
कामचारप्रभञ्जिन्यै । कौमार्यै । करुणापाङ्ग्यै । ककुवन्तायै ।
करिप्रियायै । केशर्यै । केशवनुतायै । कदम्बायै । कुसुमप्रियायै ।
कालिन्द्यै । कालिकायै । काञ्च्यै । कलशोद्भवसंस्तुतायै ।
काममात्रे । क्रतुमत्यै । कामरूपायै नमः । १६०

ॐ कृपावत्यै नमः । कुमार्यै । कुण्डनिलयायै । किरात्यै ।
कीरवाहनायै । कैकेय्यै । कोकिलालापायै । केतकीकुसुमप्रियायै ।
कमण्डलुधरायै । काल्यै । कर्मनिर्मूलकारिण्यै । कलहंसगत्यै ।

कक्षायै । कृतकौतुकमङ्गलायै । कस्तूरीतिलकायै । कम्रायै ।
करिन्द्रगमनायै । कुह्वै । कर्पूरलेपनायै । कृष्णायै नमः । १८०

ॐ कपिलायै नमः । कुहराश्रयायै । कूटस्थायै । कुधरायै ।
कमरायै । कुक्षिस्थाखिलविष्टपायै । खड्गखेटधरायै ।
खर्वायै । खेचर्यै । खगवाहनायै । खट्वाङ्गधारिण्यै ।
ख्यातायै । खगोराजोपरिस्थितायै । खलघ्न्यै । खण्डितजरायै ।
खडाक्ष्यानप्रदायिन्यै । खण्डेन्दुतिलकायै । गङ्गायै ।
गणेशगुहपूजितायै । गायत्र्यै नमः । २००

ॐ गोमत्यै नमः । गीतायै । गान्धार्यै । गानलोलुपायै । गौतम्यै ।
गामिन्यै । गाधायै । गन्धर्वाप्सरसेवितायै । गोविन्दचरणाक्रान्तायै ।
गुणत्रयविभावितायै । गन्धर्व्यै । गह्वर्यै । गोत्रायै । गिरीशायै ।
गहनायै । गम्यै । गुहावासायै । गुणवत्यै । गुरुपापप्रणासिन्यै ।
गुर्व्यै नमः । २२०

ॐ गुणवत्यै नमः । गुह्यायै । गोप्तव्यायै । गुणदायिन्यै । गिरिजायै ।
गुह्यमातङ्ग्यै । गरुडध्वजवल्लभायै । गर्वापहारिण्यै ।
गोदायै । गोकुलरभायै । गदाधरायै । गोकर्णनिलयासक्तायै ।
गुह्यमण्डलवर्तिन्यै । घर्मदायै । घनदायै । घण्टायै ।
घोरदानवमर्दिन्यै । घृणिमन्त्रमय्यै । घेषायै ।
घनसम्पातदायिन्यै नमः । २४०

ॐ घण्टारवप्रियायै नमः । घ्राणायै । घृणिसन्तुष्टिकारिण्यै ।
घनारिमण्डलायै । घूर्णायै । घृताच्यै । घणवेगिन्यै ।
ज्ञानधातुमय्यै । चर्चायै । चर्चितायै । चारुहासिन्यै । चटुलायै ।
चण्डिकायै । चित्रायै । चित्रमाल्यविभूषितायै । चतुर्भुजायै ।
चारुदन्तायै । चातुर्यै । चरितप्रदायै । चूलिकायै नमः । २६०

ॐ चित्रवस्त्रान्तायै नमः । चन्द्रमःकर्णकुण्डलायै ।
चन्द्रहासायै । चारुदात्र्यै । चकोर्यै । चन्द्रहासिन्यै ।
चन्द्रिकायै । चन्द्रधात्र्यै । चौर्यै । चोरायै । चण्डिकायै ।
चञ्चद्वागवादिन्यै । चन्द्रचूडायै । चोरविनाशिन्यै ।
चारुचन्दनलिप्ताङ्ग्यै । चञ्चच्चामरविजितायै । चारुमध्यायै ।
चारुगत्यै । चण्डिलायै । चन्द्ररूपिण्यै नमः । २८०

ॐ चारुहोमप्रियायै नमः । चार्वायै । चरितायै । चक्रबाहुकायै ।
चन्द्रमण्डलमध्यस्थायै । चन्द्रमण्डलदर्पणायै । चक्रवाकस्तन्यै ।
चेष्टायै । चित्रायै । चारुविलासिन्यै । चित्स्वरूपायै । चन्द्वत्यै ।
चन्द्रमायै । चन्दनप्रियायै । चोदयित्र्यै । चिरप्रज्ञायै ।
चातकायै । चारुहेतुक्यै । छत्रयातायै । छत्रधरायै नमः । ३००

ॐ छायायै नमः । छन्दपरिच्छदायै । छायादेव्यै । छिद्रनखायै ।
छन्नेन्द्रियविसर्पिण्यै । छन्दोनुष्टुप्प्रतिष्ठान्तायै ।
छिद्रोपद्रवभेदिन्यै । छेदायै । छत्रेश्वर्यै । छिन्नायै ।
छुरिकायै । छेलन्प्रियायै । जनन्यै । जन्मरहितायै । जातवेदायै ।
जगन्मय्यै । जाह्नव्यै । जटिलायै । जेत्र्यै । जरामरणवर्जितायै नमः । ३२०

ॐ जम्बुद्वीपवत्यै नमः । ज्वालायै । जयन्त्यै । जलशालिन्यै ।
जितेन्द्रियायै । जितक्रोधायै । जितामित्रायै । जगत्प्रियायै ।
जातरूपमय्यै । जिह्वायै । जानक्यै । जगत्यै । जयायै । जनित्र्यै ।
जह्नुतनयायै । जगत्त्रयहितैषिण्यै । ज्वालमुल्यै । जपवत्यै ।
ज्वरघ्न्यै । जितविष्टपायै नमः । ३४०

ॐ जिताक्रान्तमय्यै नमः । ज्वालायै । जाग्रत्यै । ज्वरदेवतायै ।
ज्वलन्त्यै । जलदायै । ज्येष्ठायै । ज्याघोषस्फोटदिङ्मुख्यै ।
जम्भिन्यै । जृम्भनायै । जृम्भायै । ज्वलन्माणिक्यकुण्डलायै ।
झिञ्झिकायै । झणनिर्घोषायै । झञ्झामारुतवेगिन्यै ।
झल्लकीवाद्यकुशलायै । ञरूपायै । ञभुजायै । टङ्कभेदिन्यै ।
टङ्कबाणसमायुक्तायै नमः । ३६०

ॐ टङ्किन्यै नमः । टङ्कभेदिन्यै । टङ्कीगणकृताघोषायै ।
टङ्कनीयमहोरसायै । टङ्कारकारिण्यै । ठ ठ शब्दनिनादिन्यै ।
डामर्यै । डाकिन्यै । डिम्भायै । डुण्डुमारैकनिर्जितायै ।
डामरीतन्त्रमार्गस्थायै । डण्डडमरुनादिन्यै । डिण्डिरवसहायै ।
डिम्भलसाक्रीडापरायणायै । ढुण्ढिविघ्नेशजनन्यै । ढकाहस्तायै ।
ढिलिव्रजायै । नित्यज्ञानायै । निरुपणायै । निर्गुणायै नमः । ३८०

ॐ नर्मदायै नमः । त्रिगुणायै । त्रिपदायै । तन्त्र्यै । तुलस्यै ।
(तरुणायै । तरवे । त्रिविक्रमपदाक्रान्तायै । तुरीयपदगामिन्यै ।)
तरुणादित्यसङ्काशायै । तामस्यै । तुहिनायै । तुरायै ।

त्रिकालज्ञानसम्पन्नायै । त्रिवल्यै (त्रिवेण्यै) । त्रिलोचनायै । त्रिशक्त्यै ।
त्रिपुरायै । तुङ्गायै । तुरङ्गवदनायै । तिमिङ्गिलगिलायै । तीव्रायै ।
त्रिश्रोतायै । तामसादिन्यै नमः । ४००

ॐ तन्त्रमन्त्रविशेषज्ञायै नमः । तनुमध्यायै ।
त्रिविष्टपायै । त्रिसन्ध्यायै । त्रिस्तन्यै । तोषासंस्थायै ।
तालप्रतापिन्यै । ताटङ्किन्यै । तुषाराभायै । तुहिनाचलवासिन्यै ।
तन्तुजालसमायुक्तायै । तारहारावलिप्रियायै । तिलहोमप्रियायै ।
तीर्थायै । तमालकुसुमाकृत्यै । तप्तकाञ्चनसंकाशायै । तारकायै ।
त्रियुतायै । तन्व्यै । त्रिशङ्कुपरिवारितायै नमः । ४२०

ॐ तलोदर्यै नमः । तिरोभासायै । ताटङ्कप्रियवाहिन्यै ।
त्रिजटायै । तित्तिर्यै । तृष्णायै । त्रिविधायै । तरुणाकृत्यै ।
तप्तकाञ्चनभूषणायै । त्रयम्बकायै । त्रिवर्गायै ।
त्रिकालज्ञानदायिन्यै । तर्पणायै । तृप्तिदायै । तृप्तायै । तमस्यै ।
तुम्बरुस्तुतायै । तार्क्ष्यस्थायै । त्रिगुणाकारायै । त्रिभङ्ग्यै नमः । ४४०

ॐ तनुवल्लर्यै नमः । थात्कार्यै । थारवायै । थान्तायै । दोहिन्यै ।
दीनवत्सलायै । दानवान्तकर्यै । दुर्गायै । दुर्गासुरनिवर्हण्यै ।
देवरीत्यै । दिवारात्र्यै । द्रौपद्यै । दुन्दुभिस्वनायै । देवयान्यै ।
दुरावासायै । दारिद्र्यभेदिन्यै । दिवायै । दामोदरप्रियायै । दीप्तायै ।
दिग्वासायै नमः । ४६०

ॐ दिग्विमोहिन्यै नमः । दण्डकारण्यनिलयायै । दण्डिन्यै । देवपूजितायै ।
देववन्द्यायै । दिविषादायै । द्वेषिण्यै । दानावाकृत्यै ।
दीननाथस्तुतायै । दीक्षायै । दैवतादिस्वरूपिण्यै । धात्र्यै ।
धनुर्धरायै । धनुर्धारिण्यै । धर्मचारिण्यै । धुरन्धरायै ।
धराधारायै । धनदायै । धान्यदोहिन्यै । धर्मशीलायै नमः । ४८०

ॐ धनाध्यक्षायै नमः । धनुर्वेदविशारदायै । धृत्यै । धन्यायै ।
धृतपदायै । धर्मराजप्रियायै । ध्रुवायै । धूमावत्यै ।
धूमकेश्यै । धर्मशास्त्रप्रकाशिन्यै । नन्दायै । नन्दप्रियायै ।
निद्रायै । नृनुतायै । नन्दनात्मिकायै । नर्मदायै । नलिन्यै ।
नीलायै । नीलकण्ठसमाश्रयारुद्राण्यै । नारायणप्रियायै नमः । ५००

ॐ नित्यायै नमः । निर्मलायै । निर्गुणायै । निध्यै । निराधारायै ।

निरुपमायै । नित्यशुद्धायै । निरञ्जनायै । नादबिन्दुकलातीतायै ।
नादबिन्दुकलात्मिकायै । नृसिंहिन्यै । नगधरायै ।
नृपनागविभूषितायै । नरकक्लेशनाशिन्यै । नारायणपदोद्भवायै ।
निरवद्यायै । निराकारायै । नारदप्रियकारिण्यै । नानाज्योतिस्समाख्यातायै ।
निधिदायै नमः । ५२०

ॐ निर्मलात्मिकायै नमः । नवसूत्रधरायै । नीत्यै ।
निरुपद्रवकारिण्यै । नन्दजायै । नवरत्नाढ्यायै ।
नैमिषारण्यवासिन्यै । नवनीतप्रियायै । नार्यै । नीलजीमूतनिस्वनायै ।
निमेषिण्यै । नदीरूपायै । नीलग्रीवायै । निशिश्वर्यै । नामावल्यै ।
निशुम्भघ्न्यै । नागलोकनिवासिन्यै । नवजाम्बूनादप्रख्यायै ।
नागलोकाधिदेवतायै । नूपूराक्रान्तचरणायै नमः । ५४०

ॐ नरचित्तप्रमोदिन्यै नमः । निमग्नारक्तनयनायै ।
निर्घातसमनिस्वनायै । नन्दनोद्यनिलयायै । पार्वत्यै ।
परमोदारायै । परब्रह्मात्मिकायै । परायै । पञ्चकोशविनिर्मुक्तायै ।
पञ्चपातकनाशिन्यै । परचित्तविधानज्ञायै । पञ्चिकायै ।
पञ्चरूपिण्यै । पूर्णिमायै । परमायै । प्रीत्यै । परतेजःप्रकाशिन्यै ।
पुराण्यै । पौरुष्यै । पुण्यायै नमः । ५६०

ॐ पुण्डरीकनिभक्षनायै नमः । पातालतलनिर्मग्नायै । प्रीतायै ।
प्रीथिविवर्धिन्यै । पावन्यै । पादसहितायै । पेशलायै । पवनाशिन्यै ।
प्रजापत्यै । परिश्रान्तायै । पर्वतस्तनमण्डलायै । पद्मप्रियायै ।
पद्मसंस्थायै । पद्माक्ष्यै । पद्मसम्भवायै । पद्मपत्रायै ।
पद्मपदायै । पद्मिन्यै । प्रियभाषिण्यै ।
पशुपाशविनिर्मुक्तायै नमः । ५८०

ॐ पुरन्ध्र्यै नमः । पुरवासिन्यै । पुष्कलायै । पुरुषायै । पर्वायै ।
पारिजातकुसुमप्रियायै । पतिव्रतायै । पतिव्रतायै । पवित्राङ्ग्यै ।
पुष्पहासपरायणायै । प्रज्ञावतीसुतायै (प्रजावतीसुतायै) ।
पौत्र्यै । पुत्रपूज्यायै । पयस्विन्यै । पत्तिपाशधरायै । पङ्क्त्यै ।
पितृलोकप्रदायिन्यै । पुराण्यै । पुण्यशिलायै ।
प्रणतार्तिविनाशिन्यै नमः । ६००

ॐ प्रद्युम्नजनन्यै नमः । पुष्टायै । पितामहपरिग्रहायै ।

पुण्डरीकपुरावासायै । पुण्डरीकसमाननायै । पृथुजङ्घायै ।
पृथुभुजायै । पृथुपादायै । पृथूदर्यै । प्रवालशोभायै ।
पिङ्गाक्ष्यै । पीतवासाः । प्रचापलायै । प्रसवायै । पुष्टिदायै ।
पुण्यायै । प्रतिष्ठायै । प्रणवायै । पत्यै । पञ्चवर्णायै नमः । ६२०

ॐ पञ्चवाण्यै नमः । पञ्चिकायै । पञ्जरास्थितायै । परमायायै ।
परज्योतिः । परप्रीत्यै । परागत्यै । पराकाष्ठायै । परेशन्यै ।
पावन्यै । पावकद्युत्यै । पुण्यभद्रायै । परिच्छेद्यायै ।
पुष्पहासायै । पृथूदरायै । पीताङ्ग्यै । पीतवसनायै । पीतशयायै ।
पिशाचिन्यै । पीतक्रियायै नमः । ६४०

ॐ पिशाचघ्न्यै नमः । पाटलाक्ष्यै । पटुक्रियायै ।
पञ्चभक्षप्रियाचारायै । पुतनाप्राणघातिन्यै ।
पुन्नागवनमध्यस्थायै । पुण्यतीर्थनिषेवितायै । पञ्चाङ्ग्यै ।
पराशक्त्यै । परमाह्लादकारिण्यै । पुष्पकाण्डस्थितायै ।
पूषायै । पोषिताखिलविष्टपायै । पानप्रियायै । पञ्चशिखायै ।
पन्नगोपरिशायिन्यै । पञ्चमात्रात्मिकायै । पृथ्व्यै । पथिकायै ।
पृथुदोहिन्यै नमः । ६६०

ॐ पुराणन्यायमीमांसायै नमः । पाटल्यै । पुष्पगन्धिन्यै ।
पुण्यप्रजायै । पारदात्र्यै । परमार्गैकगोचरायै ।
प्रवालशोभायै । पूर्णाशायै । प्रणवायै । पल्लवोदर्यै ।
फलिन्यै । फलदायै । फल्ग्वै । फुत्कार्यै । फलकाकृत्यै ।
फणिन्द्रभोगशयनायै । फणिमण्डलमण्डितायै । बालबालायै ।
बहुमतायै । बालातपनीभांशुकायै नमः । ६८०

ॐ बलभद्रप्रियायै नमः । बडवायै । बुद्धिसंस्तुतायै ।
बन्दीदेव्यै । बिलवत्यै । बडिशघिन्यै । बलिप्रियायै । बान्धव्यै ।
बोधितायै । बुद्धिबन्धुककुसुमप्रियायै । बालभानुप्रभाकरायै ।
ब्राह्म्यै । ब्राह्मणदेवतायै । बृहस्पतिस्तुतायै । वृन्दायै ।
वृन्दावनविहारिण्यै । बालाकिन्यै । बिलाहारायै । बिलवसायै ।
बहुदकायै नमः । ७००

ॐ बहुनेत्रायै नमः । बहुपदायै । बहुकर्णावतंसिकायै ।
बहुबाहुयुतायै । बीजरूपिण्यै । बहुरूपिण्यै । बिन्दुनादकलातीतायै ।

बिन्दुनादस्वरूपिण्यै । बद्धगोधाङ्गुलिप्राणायै । बदर्याश्रमवासिन्यै ।
वृन्दारकायै । बृहत्स्कन्धायै । बृहत्यै । बाणपातिन्यै ।
वृन्दाध्यक्षायै । बहुनुतायै । बहुविक्रमायै । बद्धपद्मासनासीनायै ।
बिल्वपत्रतलस्थितायै । बोधिद्रुमनिजावासायै नमः । ७२०

ॐ बडिष्ठायै नमः । बिन्दुदर्पणायै । बालायै । बाणासनवत्यै ।
बडवानलवेगिन्यै । ब्रह्माण्डबहिरन्तस्थायै । ब्रह्मकङ्कणसूत्रिण्यै ।
भवान्यै । भीष्णवत्यै । भाविन्यै । भयहारिण्यै । भद्रकाल्यै ।
भुजङ्गाक्ष्यै । भारत्यै । भारताशयायै । भैरव्यै ।
भीषणाकारायै । भूतिदायै । भूतिमालिन्यै । भामिन्यै नमः । ७४०

ॐ भोगनिरतायै नमः । भद्रदायै । भूरिविक्रमायै । भूतवासायै ।
भृगुलतायै । भार्गव्यै । भूसुरार्चितायै । भागीरथ्यै ।
भोगवत्यै । भवनस्थायै । भिषग्वरायै । भामिन्यै । भोगिन्यै ।
भाषायै । भवान्यै । भूरुदक्षिणायै । भर्गात्मिकायै । भीमावत्यै ।
भवबन्धविमोचिन्यै । भजनीयायै नमः । ७६०

ॐ भूतधात्रीरञ्जितायै नमः । भुवनेश्वर्यै । भुजङ्गवलयायै ।
भीमायै । भेरुण्डायै । भागधेयिन्यै । मात्रे । मायायै । मधुमत्यै ।
मधुजिह्वायै । मनुप्रियायै । महादेव्यै । महाभाग्यायै । मालिन्यै ।
मीनलोचनायै । मायातीतायै । मधुमत्यै । मधुमांसायै ।
मधुद्रवायै । मानव्यै नमः । ७८०

ॐ मधुसम्भूतायै नमः । मिथिलापुरवासिन्यै ।
मधुकैटभसंहर्त्र्यै । मेदिन्यै । मेघमालिन्यै । मन्दोदर्यै ।
महामायायै । मैथिल्यै । मसृणप्रियायै । महालक्ष्म्यै ।
महाकाल्यै । महाकन्यायै । महेश्वर्यै । माहेन्द्र्यै । मेरुतनयायै ।
मन्दारकुसुमार्चितायै । मञ्जुमञ्जीरचरणायै । मोक्षदायै ।
मञ्जुभाषिण्यै । मधुरद्राविण्यै नमः । ८००

ॐ मुद्रायै नमः । मलयायै । मलयान्वितायै । मेधायै ।
मरकतश्यामायै । मगध्यै । मेनकात्मजायै । महामार्यै ।
महावीरायै । महाश्यामायै । मनुस्तुतायै । मातृकायै ।
मिहिराभासायै । मुकुन्दपदविक्रमायै । मूलाधारस्थितायै । मुग्धायै ।
मणिपुरनिवासिन्यै । मृगाक्ष्यै । महिषारूढायै ।

महिषासुरमर्दिन्यै नमः । ८२०

ॐ योगासनायै नमः । योगगम्यायै । योगायै । यौवनकाश्रयायै ।
यौवन्यै । युद्धमध्यस्थायै । यमुनायै । युगधारिण्यै । यक्षिण्यै ।
योगयुक्तायै । यक्षराजप्रसूतिन्यै । यात्रायै । यानविधानज्ञायै ।
यदुवंशसमुद्भवायै । यकारादिहकारान्तायै । याजुष्यै ।
यज्ञरूपिण्यै । यामिन्यै । योगनिरतायै । यातुधानभयङ्कर्यै नमः । ८४०

ॐ रुक्मिण्यै नमः । रमण्यै । रामायै । रेवत्यै । रेणुकायै ।
रत्यै । रौद्र्यै । रौद्रप्रियाकारायै । राममात्रे । रतिप्रियायै ।
रोहिण्यै । राज्यदायै । रेवायै । रसायै । राजीवलोचनायै । राकेश्यै ।
रूपसम्पन्नायै । रत्नसिंहासनस्थितायै । रक्तमाल्याम्बरधरायै ।
रक्तगन्धानुलेपनायै नमः । ८६०

ॐ राजहंससमारूढायै नमः । रंभायै । रक्तवलिप्रियायै ।
रमणीययुगाधारायै । राजिताखिलभूतलायै । रुद्राण्यै ।
रुरुचर्मपरिधानायै । रथिन्यै । रत्नमालिकायै । रोगेश्यै ।
रोगशमन्यै । राविन्यै । रोमहर्षिण्यै । रामचन्द्रपदाक्रान्तायै ।
रावणच्छेदकारिण्यै । रत्नवस्त्रपरिच्छिन्वायै । रथस्थायै ।
रुक्मभूषणायै । लज्जाधिदेवतायै । लोलायै नमः । ८८०

ॐ ललितायै नमः । लिङ्गधारिण्यै । लक्ष्म्यै । लोलायै । लुप्तविषायै ।
लोकिन्यै । लोकविश्रुतायै । लज्जायै । लम्बोदर्यै । ललनायै ।
लोकधारिण्यै । वरदायै । वन्दितायै । वन्द्यायै । वनितायै । विद्यायै ।
वैष्णव्यै । विमलाकृत्यै । वाराह्यै । विरजायै नमः । ९००

ॐ वर्षायै नमः । वरलक्ष्म्यै । विक्रमायै । विलासिन्यै । विनतायै ।
व्योममध्यस्थायै । वारिजासनसंस्थितायै । वारुण्यै । वेणुसम्भूतायै ।
वितिहोत्रायै । विरूपिण्यै । वायुमण्डलमध्यस्थायै । विष्णुरूपायै ।
विधिक्रियायै । विष्णुपत्न्यै । विष्णुमत्यै । विशालाक्ष्यै ।
वसुन्धरायै । वामदेवप्रियायै । वेलायै नमः । ९२०

ॐ वज्रिण्यै नमः । वसुदोहिन्यै । वेदाक्षरपरिताङ्ग्यै ।
वाजपेयफलप्रदायै । वासव्यै । वामजनन्यै । वैकुण्ठनिलयायै ।
वरायै । व्यासप्रियायै । वर्मधरायै । वाल्मीकिपरिसेवितायै ।
शाकम्भर्यै । शिवायै । शान्तायै । शारदायै । शरणागत्यै ।

शतोदर्यै । शुभाचारायै । शुम्भासुरनर्दिन्यै । शोभावत्यै नमः । ९४०

ॐ शिवाकारायै नमः । शङ्करार्धशरीरिण्यै । शोणायै ।
शुभाशयायै । शुभ्रायै । शिरःसन्धानकारिण्यै । शरावत्यै ।
शरानन्दायै । शरज्ज्योत्स्नायै । शुभाननायै । शरभायै । शूलिन्यै ।
शुद्धायै । शर्वाण्यै । शर्वरीवन्द्यायै । शबर्यै । शुकवाहनायै ।
श्रीमत्यै । श्रीधरानन्दायै । श्रवणानन्ददायिन्यै नमः । ९६०

ॐ षड्भाशायै नमः । षड्तुप्रियायै । षडाधारस्थितादेव्यै ।
षण्मुखप्रियकारिण्यै । षडङ्गरूपसुमत्यै । षुरासुरनमस्कृतायै ।
सरस्वत्यै । सदाधारायै । सर्वमङ्गलकारिण्यै । सामगानप्रियायै ।
सूक्ष्मायै । सावित्र्यै । सामसम्भवायै । सर्ववासायै । सदानन्दायै ।
सुस्तन्यै । सागराम्बरायै । सर्वैश्वर्यप्रियायै । सिद्ध्यै ।
साधुबन्धुपराक्रमायै नमः । ९८०

ॐ सप्तर्षिमण्डलगतायै नमः । सोममण्डलवासिन्यै । सर्वज्ञायै ।
सान्द्रकरुणायै । समानाधिकवर्जितायै । सर्वोत्तुङ्गायै । सङ्गहीनायै ।
सद्गुणायै । सकलेष्टदायै । सरघायै । सूर्यतनयायै । सुकेश्यै ।
सोमसंहत्यै । हिरण्यवर्णायै । हरिण्यै । ह्रीङ्कार्यै । हंसवाहिन्यै ।
क्षौमवस्त्रपरिताङ्ग्यै । क्षीराब्धितनयायै । क्षमायै नमः । १०००

ॐ गायत्र्यै नमः । सावित्र्यै । पार्वत्यै । सरस्वत्यै । वेदगर्भायै ।
वरारोहायै । श्रीगायत्र्यै । परांविकायै नमः । १००८

॥ इति श्रीदेवीभागवते महापुराणे द्वादशस्कन्धे
श्रीगायत्रीसहस्रनामावलीः समाप्ता ॥

akArAdikShakArAnta
The numbering is slightly different than SVRadhakrishnan's
Bhagavati stuti manjari. The 20-21 is sometimes split
ajapAyai avidyAyai, or some treat it as ajapAvidyAyai,
so there is some subjectivity. Also some plus-minues based on
names around 385. Chanting the stotram may be better if
one is not performing sahasrArchana. The names are meaningful.
Devotion is to be emphasized than the numbers and splits.

Encoded by Sunder Hattangadi

*1008 names of Gayatri*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*